# shrIshanivajrapanjarakavacham

# શ્રીશનિવજ્રપંજરકવચમ્

## Document Information

Text title : shanivajrapa.njarakavacham

File name : shanaivajrakavach.itx

Category : kavacha, navagraha

Location : doc_z_misc_navagraha

Author : Traditional

Proofread by : NA, Kirk Wortman kirkwort at hotmail.com

Description-comments : brahmANDapurANa

Latest update : February 23, 2003, November 11, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીશનિવજ્રપંજરકવચમ્

શ્રી ગણેશાય નમઃ ॥

વિનિયોગઃ ।
ॐ અસ્ય શ્રીશનૈશ્ચરવજ્રપઞ્જર કવચસ્ય કશ્યપ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રી શનૈશ્ચર દેવતા,
શ્રીશનૈશ્ચર પ્રીત્યર્થે જપે વિનિયોગઃ ॥

ઋષ્યાદિ ન્યાસઃ ।
શ્રીકશ્યપ ઋષયેનમઃ શિરસિ ।
અનુષ્ટુપ્ છન્દસે નમઃ મુખે ।
શ્રીશનૈશ્ચર દેવતાયૈ નમઃ હૃદિ ।
શ્રીશનૈશ્ચરપ્રીત્યર્થે જપે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ધ્યાનમ્ ।
નીલામ્બરો નીલવપુઃ કિરીટી ગૃધ્રસ્થિતસ્ત્રાસકરો ધનુષ્માન્ ।
ચતુર્ભુજઃ સૂર્યસુતઃ પ્રસન્નઃ સદા મમ સ્યાદ્ વરદઃ પ્રશાન્તઃ ॥ ૧॥

બ્રહ્મા ઉવાચ ॥

શ‌ૃણુધ્વમૃષયઃ સર્વે શનિપીડાહરં મહત્ ।
કવચં શનિરાજસ્ય સૌરેરિદમનુત્તમમ્ ॥ ૨॥

કવચં દેવતાવાસં વજ્રપંજરસંજ્ઞકમ્ ।
શનૈશ્ચરપ્રીતિકરં સર્વસૌભાગ્યદાયકમ્ ॥ ૩॥

ॐ શ્રીશનૈશ્ચરઃ પાતુ ભાલં મે સૂર્યનન્દનઃ ।
નેત્રે છાયાત્મજઃ પાતુ પાતુ કર્ણૌ યમાનુજઃ ॥ ૪॥

નાસાં વૈવસ્વતઃ પાતુ મુખં મે ભાસ્કરઃ સદા ।
સ્નિગ્ધકણ્ઠશ્ચ મે કણ્ઠં ભુજૌ પાતુ મહાભુજઃ ॥ ૫॥

સ્કન્ધૌ પાતુ શનિશ્ચૈવ કરૌ પાતુ-શુભપ્રદઃ ।
વક્ષઃ પાતુ યમભ્રાતા કુક્ષિં પાત્વસિતસ્તથા ॥ ૬॥

નાભિં ગ્રહપતિઃ પાતુ મન્દઃ પાતુ કટિં તથા ।
ઊરૂ મમાન્તકઃ પાતુ યમો જાનુયુગં તથા ॥ ૭॥

પાદૌ મન્દગતિઃ પાતુ સર્વાંગં પાતુ પિપ્પલઃ ।
અંગોપાંગાનિ સર્વાણિ રક્ષેન્ મે સૂર્યનન્દનઃ ॥ ૮॥

ઇત્યેતત્ કવચં દિવ્યં પઠેત્ સૂર્યસુતસ્ય યઃ ।
ન તસ્ય જાયતે પીડા પ્રીતો ભવતિ સૂર્યજઃ ॥ ૯॥

વ્યય-જન્મ-દ્વિતીયસ્થો મૃત્યુસ્થાનગતોઽપિ વા ।
કલત્રસ્થો ગતો વાપિ સુપ્રીતસ્તુ સદા શનિઃ ॥ ૧૦॥

અષ્ટમસ્થે સૂર્યસુતે વ્યયે જન્મદ્વિતીયગે ।
કવચં પઠતે નિત્યં ન પીડા જાયતે ક્વચિત્ ॥ ૧૧॥

ઇત્યેતત્કવચં દિવ્યં સૌરેર્યન્નિર્મિતં પુરા ।
દ્વાદશાષ્ટમજન્મસ્થદોષાન્નાશયતે સદા ।
જન્મલગ્નસ્થિતાન્ દોષાન્ સર્વાન્નાશયતે પ્રભુઃ ॥ ૧૨॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે બ્રહ્મ-નારદસંવાદે
શનિવજ્રપંજરકવચં સમ્પૂર્ણમ્ ॥

Proofread by Kirk Wortman kirkwort at hotmail.com

*shrIshanivajrapanjarakavacham*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*